शास्त्री -द्वितीय खण्ड साहित्य

अभिज्ञान शाकुन्तलम्

Saathi

Date __/__/__

प्र०(1)- एषा वि पिएण विणा गमेइ रअणिं विसाअदीहअरं ।
गरुअं वि विरहदुक्खं आसाबंधो सहावेदि ॥
[एषापि प्रियेण विना गमयति रजनीं विषाददीर्घतराम् ।
गुर्वपि विरहदुःखमाशाबन्धः साहयति ॥]

उत्तरम् - प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य चतुर्थाङ्कात् उद्धृतोऽस्ति।

व्याख्या- अस्मिन् अनसूया सखिम्प्रति कथयति - पत्रे विरहितमपि प्रियमपश्यन्तीं दुःखितां चक्रवाकवधूं विलोक्य दुःखितां शकुन्तलां सान्त्वयन्ती अनसूयाप्राह - एषापि = चक्रवाकवधूरपि प्रियं बिना क्षणमपि मात्रं न तिष्ठन्ती. तद्विरहमसहमाना प्रियेण = सहचरेण चक्रवाकेन विना विरहिता विषाददीर्घतराम् = विषादेन = प्रियविरहजन्यदुःखेन दीर्घतरां = दीर्घत्वेनानुमितां रजनीं रागिणोजना अस्यामिति रजनी तां रजनीं = रात्रिम् गमयति = यापयति । आशाबन्धः = आशा = कदापि सम्बन्धो भवेदिति सम्भावना एव बन्धः = बन्धनमिति आशाबन्धः = सङ्गमाशातन्तुः गुरु अपि = दुर्वहमपि विरहदुःखं = विरहपीडाम साहयति सहनयोग्यं करोति । त्वयापि भर्तृप्राप्तिपर्यन्तमेव दुःखं सोढव्यमिति भावः।

Renu Devi
29/09/20

राधा उमाकान्त सं० महावि० सुखसेना
पूर्णिया ।

उपशास्त्री-II खण्ड साहित्य - तृतीयपत्रम्
रघुवंश महाकाव्यम्

Date ___/___/_____

प्र०(1) उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ।
ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्त्रविणीं न सिंहम् ॥

उत्तरम्- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके राजा दिलीपं प्रति नन्दिनी कथयति -

व्याख्याः- राजा = दिलीपः, अमृतायमानं = सुधामधुरम्, उत्थितं = उद्भूतम्, वत्स! = हे पुत्र! उत्तिष्ठ = उत्थितो भव, इति = ईदृशम्, वचः = वाक्यम्, निशम्य = श्रुत्वा, उत्थितः = भूमेरुत्थितः, सन् = भवन्, अग्रतः = पुरतः, प्रस्त्रविणीं = पयःस्रवन्तीम्, गां = नन्दिनीं धेनुम्, स्वां = निजाम्, जननीम् = मातरम्, इव = यथा, ददर्श = अपश्यत्, सिंहं = मृगेन्द्रम्, न = नैव ददर्श ।

भावार्थः- राजा दिलीपः हे वत्स! उत्तिष्ठ इति धेनोर्मधुरां वाणीमाकर्ण्य उत्थायञ्च सम्मुखे स्थितां स्नेहेन क्षीरं स्रवन्तीं निजमातरमिव नन्दिनीं ददर्श किन्तु सिंहं तु न ददर्श ।

Renu Devi
29/09/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिमा ।

Page No.

शास्त्री - II खण्ड साहित्य
रत्नावली - नाटिका

Saathi

Date __/__/____

प्रश्न- द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ॥

उत्तरम्- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि श्रीहर्षवर्धनदेव प्रणीतस्य रत्नावली नाटिकायाः प्रथमङ्कात् उद्धृतास्ति ।
अस्मिन् श्लोके सूत्रधारः कथयति-

व्याख्या- द्वीपात् = अन्तरीपात् । अपि च, जलनिधेः = सागरस्य, मध्यात् = अन्तरालात् । अपि च, दिशः = काष्ठायाः ('दिशस्तु ककुभः काष्ठा' इत्यमरः) अन्तात् = अन्तिम-भागात् । (अपि च) अभिमतम् = अभीष्टम् (वस्तु)। झटिति = शीघ्रम् । आनीय = उपकल्प्य । घटयति = मेलयति । अत्राप्रस्तुतप्रशंसालङ्कारः । आर्यावृत्तम् । तद्यथा - "यस्याः पादे प्रथमे द्वादशमात्रा तथा तृतीयेऽपि अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या" इति॥

Renu Devi
29/09/20

राधा उमाकान्त सं० महावि० सुरसेना,
पूर्णिया ।

Page No.

उपशास्त्री - द्वितीय खण्ड साहित्य तृतीय - पत्रम्
रघुवंश - महाकाव्यम्
द्वितीयः सर्गः

प्र० (1) - तस्मिन् क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम् ।
अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ॥

उत्तरम् = प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके राजा दिलीपस्योपरि पुष्पवृष्टिः अभवत् - सिंहो मां द्राग् विदारयिष्यतीति उत्प्रेक्षमाणस्याधोमुखस्य राज्ञो दिलीपस्य मूर्ध्नि अहो ! गवार्थे सम्राडपि विशङ्कं स्वदेहं प्रददाति, इति चकितैः विद्याधरैः विकीर्णानि कुसुमानि न्यपतन् ।

व्याख्या:- तस्मिन् क्षणे = स्वशरीरदानावसरे, उग्रं = भीषणम्, सिंहनिपातं = मृगेन्द्रनिपतनम्, उत्पश्यतः = उत्प्रेक्षमाणस्य तर्कयतः अवाङ्मुखस्य = अधोमुखस्य, प्रजानां = लोकानाम्, पालयितुः = रक्षितुः राज्ञो दिलीपस्य, उपरि = उपरिष्टात्, विद्याधरहस्तमुक्ता = विद्याधरकरविकीर्णा, पुष्पवृष्टिः = प्रसूनवर्षम्, पपात = न्यपतत् ।

Renu Devi
29/09/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया

Page No.